**Sri Sathya Sai Books and Publications Trust, Prasanthi Nilayam.**

# श्री रुद्रम्

## 10th Anuvaka

द्रापे अन्धसस्पते दरिद्रन्नीललोहित । एषां पुरुषाणामेषां पशूनां मा भेर्माऽरो मो एषां किञ्चनाममत्

drāpe andhasaspate daridrannīlaloohita। eṣām puruṣāṇāmeṣāṁ paśūnāṁ mā bhermā'roo mo eṣāṁ kiñcanāmamat .

या ते रुद्र शिवा तनूः शिवा विश्वाहभेषजी । शिवा रुद्रस्य भेषजी तया नो मृड जीवसे ॥

yā te rudra śivā tanūḥ śivā viśvāhabheṣajī। śivā rudrasya bheṣajī tayā no mṛḍa jīvase।।

इमागं् रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतिम् । यथा नः शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥

imāgṁ rudrāya tavase kapardine kṣayadvīrāya prabharāmahe matim। yathā naḥ śamasaddvipade catuṣpade viśvaṁ puṣṭaṁ grāme asminnanāturam।।

मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते । यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ ॥

mṛḍā no rudrota no mayaskṛdhi kṣayadvīrāya namasā vidhema te। yacchaṁ ca yoośca manurāyaje pitā tadaśyāma tava rudra praṇītau।।

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् । मा नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः

Mā no mahāntamuta mā no arbhakaṁ mā na ukṣantamuta mā na ukṣitam। mā no'vadhīḥ pitaraṁ mota mātaraṁ priyā mā nastanuvo rudra rīriṣaḥ

मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान्मा नो रुद्र भामितोऽवधीर्हविष्मन्तो नमसा विधेम ते

mā nastoke tanaye mā na āyuṣi mā no gooṣu mā no aśveṣu rīriṣaḥ|
vīrānmā no rudra bhāmito'vadhīrhaviṣmanto namasā vidhema te

आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु । रक्षा च नो अधि च देव ब्रूह्यधा च
नः शर्म यच्छ द्विबर्हाः

ārātte goghna uta pūruṣaghne kṣayadvīrāya sumnamasme
te astu| rakṣā ca no adhi ca deva brūhyadhā ca naḥ śarma yaccha
dvibarhāḥ

स्तुहि श्रुतं गर्तसदं युवानं मृगन्न भीममुपहत्नुमुग्रम् । मृडा जरित्रे रुद्र स्तवानो अन्यन्ते
अस्मन्निवपन्तु सेनाः

stuhi śrutaṁ gartasadaṁ yuvānaṁ mṛganna bhīmamupahatnumugram|
mṛḍā jaritre rudra stavāno anyante asmannivapantu senāḥ

परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मति रघायोः । अव स्थिरा मघवद्भ्यस्तनुष्व
मीढ्वस्तोकाय तनयाय मृडय ॥

pariṇo rudrasya hetirvṛṇaktu pari tveṣasya durmati raghāyooḥ| ava
sthirā maghavadbhayastanuṣva mīḍhvastokāya tanayāya mṛḍaya||

मीढुष्टम शिवतम शिवो नः सुमना भव । परमे वृक्ष आयुधन्निधाय कृत्तिं वसान आचर पिनाकं
बिभ्रदागहि ॥

mīḍhuṣṭama śivatama śivo naḥ sumanā bhava| parame vṛkṣa
āyudhannidhāya kṛttiṁ vasāna ācara pinākaṁ bibhradāgahi||

विकिरिद विलोहित नमस्ते अस्तु भगवः। यास्ते सहस्रग्ं हेतयोन्यमस्मन्निवपन्तु ताः

vikirida vilohita namaste astu bhagavaḥ। yāste sahasragaṁ hetayonyamasmannivapantu tāḥ

सहस्राणि सहस्रधा बाहुवोस्तव हेतयः। तासामीशानो भगवः पराचीना मुखा कृधि ॥१०॥

sahasrāṇi sahasradhā bāhuvostava hetayaḥ। tāsāmīśāno bhagavaḥ parācīnā mukhā kṛdhi|| **10**||